# शेमुषी भाग 2 (कक्षा 10)

संपूर्ण NCERT प्रश्नोत्तर एवं हल (Full Solutions)

Schorbit

# प्रथमः पाठः - शुचिपर्यावरणम्

## प्रश्न 1: एकपदेन उत्तरं लिखत -

**(क) अत्र जीवितं कीदृशं जातम्?**

उत्तर: दुर्वहम् (कठिन)

**(ख) अनिशं महानगरमध्ये किं प्रचलति?**

उत्तर: कालायसचक्रम् (लोहे का पहिया)

**(ग) कुत्सितवस्तुमिश्रितं किमस्ति?**

उत्तर: भक्ष्यम् (भोज्य पदार्थ)

**(घ) अहं कस्मै जीवनं कामये?**

उत्तर: मानवाय (मानव के लिए)

**(ङ) केषां माला रमणीया?**

उत्तर: ललितलतानाम् / हरिततरूणाम् (हरी-भरी लताओं और पेड़ों की)

## प्रश्न 2: अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत -

**(क) कविः किमर्थं प्रकृतेः शरणम् इच्छति?**

उत्तर: अत्र महानगरेषु जीवनं दुर्वहं जातम्, अतः कविः प्रकृतेः शरणम् इच्छति।

**(ख) कस्मात् कारणात् महानगरेषु संसरणं कठिनं वर्तते?**

उत्तर: महानगरेषु वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति, अतः तत्र संसरणं कठिनं वर्तते।

**(ग) अस्माकं पर्यावरणे किं किं दूषितम् अस्ति?**

उत्तर: अस्माकं पर्यावरणे वायुमण्डलं, जलं, भक्ष्यं धरातलं च सर्वं दूषितम् अस्ति।

**(घ) कविः कुत्र सञ्चरणं कर्तुम् इच्छति?**

उत्तर: कविः एकान्ते कान्तारे सञ्चरणं कर्तुम् इच्छति।

**(ङ) स्वस्थजीवनाय कीदृशे वातावरणे भ्रमणीयम्?**

उत्तर: स्वस्थजीवनाय खगकुलकलरव-गुञ्जित-वनदेशे भ्रमणीयम्।

**(च) अन्तिमे पद्यांशे कवेः का कामना अस्ति?**

उत्तर: अन्तिमे पद्यांशे कवेः कामना अस्ति यत् 'मानवाय जीवनं भवेत्, जीवन्मरणं न स्यात्।'

Scholorbit

## प्रश्न 3: सन्धिं / सन्धिविच्छेदं कुरुत -

(क) प्रकृतिः + एव = **प्रकृतिरेव**

(ख) स्यात् + न + एव = **स्यान्नैव**

(ग) **अन् + अन्ताः / हि + अनन्ताः** = ह्यनन्ताः

(घ) बहिः + अन्तः + जगति = **बहिरन्तर्जगति**

(ङ) **अस्मात्** + नगरात् = अस्मान्नगरात्

(च) सम् + चरणम् = **सञ्चरणम्**

(छ) धूमम् + मुञ्चति = **धूमं मुञ्चति**

## प्रश्न 4: अधोलिखितानाम् अव्ययानां सहायतया रिक्तस्थानानि पूरयत -

(क) इदानीं वायुमण्डलं **भृशम्** दूषितमस्ति।

(ख) **अत्र** जीवनं दुर्वहम् अस्ति।

(ग) प्राकृतिक-वातावरणे क्षणं सञ्चरणम् **अपि** लाभदायकं भवति।

(घ) पर्यावरणस्य संरक्षणम् **एव** प्रकृतेः आराधना।

(ङ) **सदा** समयस्य सदुपयोगः करणीयः।

(च) भूकम्पित-समये **बहिः** गमनमेव उचितं भवति।

(छ) **यत्र** हरितिमा **तत्र** शुचि पर्यावरणम्।

## प्रश्न 5: (अ) अधोलिखितानां पदानां पर्यायपदं लिखत -

(क) सलिलम् - **जलम्**

(ख) आम्रम् - **रसालम्**

(ग) वनम् - **कान्तारम्**

(घ) शरीरम् - **तनुः**

(ङ) कुटिलम् - **वक्रम्**

(च) पाषाणः - **प्रस्तरः**

### प्रश्न 5: (आ) अधोलिखितपदानां विलोमपदानि पाठात् चित्त्वा लिखत -

(क) सुकरम् - **दुर्वहम्**

(ख) दूषितम् - **शुचि**

(ग) गृह्णन्ती - **मुञ्चन्ती**

(घ) निर्मलम् - **समलम्**

(ङ) दानवाय - **मानवाय**

(च) सान्ताः - **अनन्ताः**

### प्रश्न 6: उदाहरणमनुसृत्य पाठात् चित्त्वा च समस्तपदानि समासनम च लिखत -

(क) हरिताः च ये तरवः (तेषां) - **हरिततरूणाम्** (कर्मधारय)

(ख) ललिताः च याः लताः (तासाम्) - **ललितलतानाम्** (कर्मधारय)

(ग) नवा मालिका - **नवमालिका** (कर्मधारय)

(घ) धृतः सुखसन्देशः येन (तम्) - **धृतसुखसन्देशम्** (बहुव्रीहि)

(ङ) कज्जलम् इव मलिनम् - **कज्जलमलिनम्** (कर्मधारय)

(च) दुर्दान्तैः दशनैः - **दुर्दान्तैर्दशनैः** (कर्मधारय)

## प्रश्न 7: रेखाङ्कित-पदमाधृत्य प्रश्ननिर्माणं कुरुत -

(क) शकटीयानं कज्जलमलिनं धूमं मुञ्चति।

**उत्तर: शकटीयानं कीदृशं धूमं मुञ्चति?**

(ख) उद्याने पक्षिणां कलरवं चेतः प्रसादयति।

**उत्तर: उद्याने केषां कलरवं चेतः प्रसादयति?**

(ग) पाषाणीसभ्यतायां लतातरुगुल्माः प्रस्तरतले पिष्टाः सन्ति।

**उत्तर: पाषाणीसभ्यतायां के प्रस्तरतले पिष्टाः सन्ति?**

(घ) महानगरेषु वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति।

**उत्तर: कुत्र / केषु वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति?**

(ङ) प्रकृत्याः सन्निधौ वास्तविकं सुखं विद्यते।

**उत्तर: कस्याः सन्निधौ वास्तविकं सुखं विद्यते?**

Schorbit